## धातुपाठे हल्–सन्धिः २

यथा उक्तं गते पाठे, यावन्तः प्रत्ययाः धातुभ्यः विहिताः सन्ति, ते सर्वे आरभ्यन्ते एभिः अच्–वर्णैः (नाम अ, आ, इ, ई, उ, ऊ, ए, ऐ इत्येभिः) अथवा एभिः हल्–वर्णैः— य्, र् / व्, म्, न् / त्, थ्, ध्, स् | यदा प्रत्ययः अज्भिः वर्णैः आरभ्यते अथवा य्, र् इत्येभिः हल्–वर्णैः आरभ्यते, तदा धातुः हलन्तः चेदपि हल्–सन्धिः न भवति (केवलं वर्ण–सम्मेलनं भवति) | धातुः हलन्तः अस्ति चेत् अथवा प्रक्रियायां हलन्तः भवति (यथा धा–धातुः, दधा + तः → दध् + तः → धत्तः), अपि च प्रत्ययः त्, थ्, ध्, स् इत्येभिः वर्णैः आरभ्यते, तस्यां दशायां हल्–सन्धिः प्रचुरः लभ्यते | व्, म्, न् इत्येभिः वर्णैः आरभ्यते चेत्, विशिष्टस्थलेषु लभ्यते | सन्धिः नाम यत्र द्वयोः वर्णयोः मेलनेन वर्णविकारः भवति | हल्–सन्धिः नाम यत्र द्वयोः हल्–वर्णयोः मेलनेन वर्णविकारः भवति, इति तु जानीमः |

सम्प्रति चत्वारः पाठाः क्रियमाणास्सन्ति येषु हलन्तेभ्यो धातुभ्यः कथं तकारादिप्रत्ययाः, थकारादिप्रत्ययाः, धकारादिप्रत्ययाः, सकारादिप्रत्ययाश्च संयुज्यन्ते इति परिशील्यमानम् | चतुर्षु पाठेषु, अयं पाठो द्वितीयः |

A. विधयः चतुर्षु विभागेषु विभक्ताः

१. हलन्तेभ्यो धातुभ्यो लङ्–लकारस्य त्–प्रत्ययः स्–प्रत्ययश्चेत्यनयोः योजनविधिः
२. हलन्तेभ्यो धातुभ्यस् सकारादिप्रत्ययानां योजनविधिः (लङ्–लकारस्य स्–प्रत्ययम् अतिरिच्य)
३. हलन्तेभ्यो धातुभ्यस् तकारादिप्रत्ययानां थकारादिप्रत्ययानां च योजनविधिः (लङ्–लकारस्य त्–प्रत्ययम् अतिरिच्य)
४. हलन्तेभ्यो धातुभ्यो धकारादिप्रत्ययानां योजनविधिः

तर्हि चतुर्षु अयं पाठः द्वितीयः | अत्र हलन्तेभ्यो धातुभ्यस् सकारादिप्रत्ययानां योजनविधिः अवलोक्यमानः (लङ्–लकारस्य स्–प्रत्ययम् अतिरिच्य) इति | अत्र मार्गः षट्प्रकारकः—

B. हलन्तधातुभ्यः सादिप्रत्ययः चेत् अधः प्रदर्शिताः सम्भावनाः

एषु सर्वत्र स्मरणीयं यत्— (१) सकारः खर्–प्रत्याहारे अस्ति, अतः बहुत्र **खरि च** (८.४.५५) इत्यनेन चर्त्वसन्धेः प्रसङ्गः; (२) सकारः झल्–प्रत्याहारे अस्ति, अतः यत्र यत्र 'झलि' इति सूत्रेषु अनुवर्तते, तत्र तत्र सकारे परे तस्य प्रसङ्गः |

१. धातोरन्तिमो वर्णः क्, ख्, ग्, घ्; च्, छ्, ज्, झ्; श्, ष् एषु अन्यतमः चेत्, तस्य वर्णस्य स्थाने ककारो भवति | (**खरि च** इत्यनेन, **चोः कुः** इत्यनेन च | शकारषकारयोः कृते **षढोः कः सि**) | अपि च नह्–धातुम् अतिरिच्य हकारस्यापि ककारः भवति |
२. धातोरन्तिमो वर्णः ट्, ठ्, ड्, ढ् एषु अन्यतमश्चेत्, तर्हि तस्य वर्णस्य स्थाने टकारो भवति (**खरि च** इत्यनेन), तदा सकारस्य ष्टुत्वम् |
३. धातोरन्तिमो वर्णः त्, थ्, द्, ध् एषु अन्यतमश्चेत्, तर्हि तस्य वर्णस्य स्थाने तकारो भवति | (**खरि च** इत्यनेन |)
४. धातोरन्तिमो वर्णः प्, फ्, ब्, भ् एषु अन्यतमश्चेत्, तर्हि तस्य वर्णस्य स्थाने पकारो भवति | (**खरि च** इत्यनेन |)
५. धातोरन्तिमो वर्णः न्, म् अनयोः अन्यतमश्चेत्, तर्हि तस्य वर्णस्य स्थाने अनुस्वारो भवति | (**नश्चापदान्तस्य झलि** इत्यनेन |)
६. धातोरन्तिमो वर्णः यकारः चेत् तस्य लोपः **लोपो व्योर्वलि** (६.१.६६) इति सूत्रेण | वकारान्तस्य हल्–सन्धि–अवसरो नास्ति |

७. धातोरन्तिमो वर्णः लकारो वा रेफो वा चेत्, तस्य विकारः नास्ति |
८. धातोरन्तिमो वर्णः सकारश्चेत्, सार्वधातुकप्रत्यये परे केवलं वर्णमेलनम्; आर्धधातुकप्रत्यये परे धात्वङ्गसकारस्य तकारादेशो भवति | (**सः स्यार्धधातुके** इत्यनेन |)
९. धातोरन्तिमो वर्णः हकारश्चेत्, नह्–धातुम् अतिरिच्य हकारस्य ककारः | (**हो ढः + षढोः कः सि** अथवा **दादेर्धातोर्घः + खरि च** |)

C. <u>कवर्गः, चवर्गः, षकारः, शकारः</u>

धातोः अन्तिमो वर्णः क्, ख्, ग्, घ्; च्, छ्, ज्, झ्; श्, ष् एषु अन्यतमः चेत्, तर्हि सादिप्रत्यये परे तस्य वर्णस्य स्थाने ककारो भवति | अपि च सादिप्रत्ययस्य सकारस्य स्थाने षकारादेशो भवति **आदेशप्रत्यययोः** (८.३.५९) इति सूत्रेण | तदा ककारषकारयोः मेलनेन क्ष् इति भवति |

शक् + स्यति → शक् + ष्यति → शक्ष्यति
लेलेख् + सि → लेलेक् + षि → लेलेक्षि
तात्वङ्ग् + सि → तात्वङ्क् + षि → तात्वङ्क्षि
जाघघ् + सि → जाघक् + षि → जाघक्षि
लालङ्घ् + सि → लालङ्क् + षि → लालङ्क्षि
वच् + सि → वक् + षि → वक्षि
प्रच्छ् + स्यति → प्रक् + ष्यति → प्रक्ष्यति
योज् + स्यति → योक् + ष्यति → योक्ष्यति
याझर्झ् + सि → याझर्क् + षि → याझर्क्षि
क्रोश् + स्यति → क्रोक् + ष्यति → क्रोक्ष्यति
कर्ष् + स्यति → कर्क् + ष्यति → कर्क्ष्यति

१. <u>क्, ख्, ग्, घ् → क्</u>

प्रत्ययस्य प्रथमवर्णः त्, थ्, ध्, स् चेत् हल्–सन्धिः भवतीति उक्तम् | तेषु वर्णेषु त्, थ्, स् च खर्–प्रत्याहारे सन्ति, अतः तेषु वर्णेषु परेषु **खरि च** इत्यनेन चर्त्वसन्धिः (तत्तत् वर्गस्य प्रथमादेशो) भवति | अत्र सादिप्रत्ययः परः अस्ति, अतः चर्त्वसन्धिः भवतु |

तस्मात् पूर्वं किन्तु **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन कवर्गीयवर्णात् परस्य प्रत्ययावयवस्य सकारस्य षत्वादेशः | (**खरि च** (८.४.५५) तदपेक्षया परत्रिपादिसूत्रम् अतः असिद्धम् |)

यथा—
त्यग् + स्यति → **आदेशप्रत्यययोः** → त्यग् + ष्यति
घोग् + सि → **आदेशप्रत्यययोः** → घोग् + षि

**आदेशप्रत्यययोः** (८.३.५९) = इण्–प्रत्याहारात् कवर्गीयात् च परे अपदान्तः आदेशरूपी प्रत्यययावयवो वा सकारः अस्ति चेत्, तस्य सकारस्य स्थाने षकारादेशो भवति | आदेशः तु मूर्धन्यवर्णस्य इत्येव उक्तं, परं **स्थानेऽन्तरतमः** इत्यनेन ट्, ठ्, ड्, ढ्, ण्, ष् इत्येषु मूर्धन्यवर्णेषु षकारस्य नैकट्यम्, अतः षकारः एव आदिष्टः भवति | नुम्, विसर्गः, शर्–प्रत्याहारस्थ–वर्णः एषु अन्यतमः मध्ये अस्ति चेदपि कार्यं भवति | इण्–प्रत्याहरे इमे वर्णाः अन्तर्भूताः— इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ, ह, य, व, र, ल | अस्य कार्यस्य नाम षत्वविधिः | आदेशश्च प्रत्ययश्च आदेशप्रत्ययौ, तयोः आदेशप्रत्यययोः इतरेतरद्वन्द्वः | षष्ठ्यन्तम् एकपदमिदं सूत्रम् | **सहे साडः सः** (८.३.५६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **नुंविसर्जनीयशर्व्यवायेऽपि** (८.३.५८) इत्यस्य पूर्णा अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | **इण्कोः** (८.३.५७), **अपदान्तस्य मूर्धन्यः** (८.३.५५) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्—**इण्कोः आदेशप्रत्यययोः अपदान्तस्य सः मूर्धन्यः संहितायां, नुंविसर्जनीयशर्व्यवायेऽपि*** |

सम्प्रति **खरि च** (८.४.५५) इत्यनेन चर्त्वादिशः—

त्यग् + ष्यति → त्यक् + ष्यति → त्यक्ष्यति
घोग् + षि → घोक् + षि → घोक्षि

**खरि च** (८.४.५५) = झलः स्थाने चरादेशो भवति खरि परे | खरि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **झलां जश् झशि** (८.४.५३) इत्यस्मात् **झलां** इत्यस्य अनुवृत्तिः; **अभ्यासे चर्च** (८.४.५४) इत्यस्मात् **चर्च** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **झलां चर् खरि च संहितायाम्** |

अन्यानि उदाहरणानि—
शशक् + सि → शशक् + षि → शशक्षि
लेलेख् + सि → लेलेख् + षि → लेलेक् + षि → लेलेक्षि
तात्वङ्ग् + सि → तात्वङ्ग् + षि → तात्वङ्क् + षि → तात्वङ्क्षि
जाघग् + सि → जाघग् + षि → जाघक् + षि → जाघक्षि
लालङ्घ् + सि → लालङ्घ् + षि → लालङ्क् + षि → लालङ्क्षि

*प्रश्नः उदेति यत् नुम्, विसर्गः, शर् व्यवाये चेदपि षत्वमित्यस्य दृष्टान्तः कः ?

व्यवाये नुम् इत्यस्य दृष्टान्ताः एते— सर्पींषि, यजूंषि, हवींषि | सर्पिस् (घृतं), यजुस् (पूजा), हविस् (हव्यम्) इति प्रातिपदिकानि | अत्र बोध्यं कथं निष्पन्नं सर्पिस् इति प्रातिपदिकम् | सृप गतौ, लटि सर्पति | सृप्–धातुः + इसि इति उणादिप्रत्ययः | सृप + इसि → अनुबन्धलोपे → सृप् + इस् → **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणः → सर्पिस् इति प्रातिपदिकम् | नपुंसके प्रथमाविभक्तौ बहुवचने सर्पिस् + इ → नुम्–आगमः → सर्पिंस् + इ → → नुम्–व्यवायेऽपि षत्वम् → सर्पींषि | अतः अयं सकारः प्रत्ययस्य एव | एवमेव यजूंषि, हवींषि |

व्यवाये विसर्गस्य दृष्टान्ताः एते— सर्पिःषु, यजुःषु, हविःषु | नपुंसके सप्तमीविभक्तौ बहुवचने सर्पिस् + सुप् → सर्पिस् इत्यस्य सकारस्य विसर्गादेशः, विसर्गस्य व्यवायेऽपि षत्वम् → सर्पिःषु | एवमेव यजुःषु, हविःषु |

व्यवाये शर्–प्रत्याहारस्य दृष्टान्ताः एते— सर्पिष्षु, यजुष्षु, हविष्षु | नपुंसके सप्तमीविभक्तौ बहुवचने सर्पिस् + सुप् → **वा शरि** (८.३.३६) इत्यनेन विकल्पेन विसर्गादिशः; पक्षे सकार एव → सकारपक्षे सकारस्य व्यवायेऽपि षत्वम् → सर्पिस् + षु → **ष्टुना ष्टुः** (८.४.४१) → सर्पिष्षु | एवमेव यजुष्षु, हविष्षु |

२. च्, छ्, ज्, झ् → क्

**चोः कुः** (८.२.३०) = चवर्गस्य स्थाने कवर्गादिशो भवति झलि पदान्ते च | चोः षष्ठ्यन्तं, कुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **चोः कुः झलि पदस्य अन्ते च** |

गते पाठे अस्य सूत्रस्य प्रयोगः अस्माभिः दृष्टः पदान्ते, लङ्–लकारप्रसङ्गे | परन्तु झलि अपि भवति इत्युक्तम् | सकारः झलि अस्ति, अतः अत्रापि इदं कार्यं प्रसक्तम् | [त्, थ्, ध्, स् एते सर्वे हल्–सन्धिनिमित्तकवर्णाः झलि सन्ति |]

**चोः कुः** इत्यनेन सकारे परे कुत्वं विहितम्—
च् → क्
छ् → ख्
ज् → ग्
झ् → घ्

चकारस्य प्रकारद्वयम्—

अ) सामान्यम् = **चोः कुः** (८.२.३०) इत्यनेन कुत्वम्

वच् + स्यति → **चोः कुः** (८.२.३०) → वक् + स्यति → **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन षत्वम् → वक् + ष्यति → वक्ष्यति

आ) व्रश्च्–धातुः

अत्र **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन षत्वम् |

वाव्रश्च् + सि → **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यनेन संयोगे पूर्वसकारलोपः → वाव्रच् + सि → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन षत्वम् → वाव्रष् + सि → **षढोः कः सि** (८.२.४१) इत्यनेन सकारे परे षकारस्य ककारादेशः → वाव्रक् + सि → **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन षत्वम् → वाव्रक्षि

प्रश्नः उदेति कथं **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यनेन शकारलोपः यदा सूत्रेण सकारलोपस्य विधानम् | सामान्यतया वदामः यत् 'वस्तुतः अत्र मूले सकारः आसीत्; श्चुत्वसन्धिना एव शकारः जातः' | अस्तु, तत्तु सत्यं; किन्तु अधुना शकारः अस्ति किल न

तु सकारः | इति चेत् कथं वा **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यनेन सकारलोपः स्यात् ? **अकृतव्यूहाः पाणिनीयाः** (५६) इति परिभाषया नशिष्यमाणं निमित्तं न स्वीकर्तव्यम् इत्यस्मात् **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन श्चुत्वसन्धेः निमित्तचकारस्य जायमानात् नाशात् **स्तोः श्चुना श्चुः** (८.४.४०) इति सूत्रं न प्रवर्तनीयमेव | अतः स्कारः तिष्ठति | वाव्रस्च् + सि → **स्कोः संयोगाद्योरन्ते च** (८.२.२९) → वाव्रच् + सि |

लङ्लकारे प्रथमपुरुषैकवचने बकारस्य नशिष्यमाणत्वात् **नश्चापदान्तस्य झलि** (८.३.२४) च **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्याभ्यां कार्यं न साधनीयमेव |

**स्कोः संयोगाद्योरन्ते च** (८.२.२९) = संयोगस्य प्रथमसदस्यः सकारः ककारः वा चेत्, संयोगस्य प्रथमसदस्यलोपो भवति न तु द्वितीयसदस्यस्य, झलि पदान्ते च | स् च क् च तयोरितरेतरद्वन्द्वः स्कौ, तयोः स्कोः | संयोगस्य आदि संयोगादि, तयोः संयोगाद्योः, षष्ठीतत्पुरुषः | **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **संयोगाद्योः स्कोः लोपः झलि पदस्य अन्ते च** |

**व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) = व्रश्च्, भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज्, छकारान्ताः शकारान्ताः चैषां धातूनाम् अन्तिमवर्णस्य स्थाने षकारादेशो भवति झलि पदान्ते च | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य एव स्थाने षकारादेशः, न तु पूर्णपदस्य | व्रश्चश्च भ्रस्जश्च सृजश्च मृजश्च यजश्च राजश्च भ्राजश्च छश्च श् च तेषामितरेतरद्वन्दः व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशः, तेषां व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशाम् | व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षष्ठ्यन्तं, षः प्रथमान्तं, द्विपदमिदं सूत्रम् | अत्र '**जच्छशां**' इति भागे **छे च** (६.१.७३) इत्यनेन तुक्-आगमे सति जत्छशां, तदा श्चुत्वसन्धौ जच्छशां | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते, च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः झलि पदस्य अन्ते च** |

**षढोः कः सि** (८.२.४१) = षकारस्य ढकारस्य च ककारादेशो भवति सकारे परे | **ष्टुना ष्टुः** (८.४.४१) इत्यस्य अपवादः | षश्च ढश्च तयोः इतरेतरद्वन्द्वः षढौ, तयोः षढोः | षढोः षष्ठ्यन्तं, कः प्रथमान्तं, सि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णं— **षढोः कः सि** |

<u>छकारस्य प्रकारद्वयम्</u>—

अ) सामान्यम् = **च्छ्वोः शूडनुनासिके च** (६.४.१९) इत्यनेन शत्वं, तदा **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन षत्वम्

पाप्रच्छ् + सि → **च्छ्वोः शूडनुनासिके च** (६.४.१९) → पाप्रश् + सि → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) → पाप्रष् + सि → **षढोः कः सि** (८.२.४१) → पाप्रक् + सि → पाप्रक् + षि → पाप्रक्षि

**च्छ्वोः शूडनुनासिके च** (६.४.१९) = तुक्-सहित-छकारस्य स्थाने शकारादेशः अपि च वकारस्य स्थाने ऊठ्-आदेशो भवति

अनुनासिकादि–प्रत्यये परे, क्वि परे, झलादि–प्रत्यये च परे | च्छ् च व् च तयोरितरेतरद्वन्द्वः च्छ्वौ, तयोः च्छ्वोः | श् च ऊठ् च तयोः समाहारद्वन्द्वः शूड् | **झलां जशोऽन्ते** (८.२.३९) इत्यनेन ठकारस्य स्थाने डकारः | च्छ्वोः षष्ठ्यन्तं, शूड् प्रथमान्तम्, अनुनासिके सप्तम्यन्तं, च अव्ययपदम्, अनेकपदमिदं सूत्रम् | **अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) इत्यस्मात् **क्विझलोः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **च्छ्वोः अङ्गस्य शूड् क्विझलोः अनुनासिके च** |

आ) रेफपूर्वक–छकारान्तधातुः = **राल्लोपः** (६.४.२१) इत्यनेन छकारलोपः

मोमुर्छ् + सि → **राल्लोपः** (६.४.२१) इत्यनेन झलादि–प्रत्यये छकारलोपः → मोमुर् + सि → **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन उपधा–गुणः → मोमोर् + सि → षत्वम् → मोमोर्षि

**राल्लोपः** (६.४.२१) = रेफात् परस्य छकारस्य वकारस्य च लोपो भवति क्वि, झलादि–प्रत्ययः, अनुनासिकः च परे अस्ति चेत् | रात् पञ्चम्यन्तं, लोपः प्रथमान्तं, द्विपदमिदं सूत्रम् | **च्छ्वोः शूडनुनासिके च** (६.४.१९) इत्यस्मात् **च्छ्वोः** इत्यस्य अनुवृत्तिः; अत्र धेयं यत् अनुवृत्तौ 'तक्–सहितः छकारः' सत्यपि व्याख्याने तुगागमो नापेक्षितः अतः न स्वीकृतः | **अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) इत्यस्मात् **अनुनासिकस्य**, **क्विझलोः** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य रात् च्छ्वोः लोपः अनुनासिके क्विझलोः** |

<u>जकारस्य प्रकारद्वयम्</u>—

अ) सामान्यम् = **चोः कुः** (८.२.३०) इत्यनेन कुत्वम्

त्यज् + स्यति → **चोः कुः** (८.२.३०) इत्यनेन सकारे (झलि) परे कुत्वम् → त्यग् + स्यति → **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन षत्वम् → त्यग् + ष्यति → **खरि च** (८.४.५५) इत्यनेन चर्त्वं → त्यक् + ष्यति → त्यक्ष्यति

योज् + स्यति → योग् + स्यति → योग् + ष्यति → योक् + ष्यति → योक्ष्यति

आ) भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज् इत्येषां षत्वम्

एतेषां षत्वं भवति **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रेण यतोहि एते धातवः असिन् सूत्रे साक्षात् उक्ताः |

बाभ्रस्ज् + सि → **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यनेन झलि परे संयोगस्य प्रथमसदस्यस्थ–सकारस्य लोपः → बाभ्रज् + सि → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन जकारस्य षत्वम् → बाभ्रष् + सि → **षढोः कः सि** (८.२.४१) इत्यनेन सकारे परे षकारस्य ककारादेशः → बाभ्रक् + सि → **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन इण्कोः प्रत्ययावयवस्य सकारस्य षत्वम् → बाभ्रक्षि

सरीसृज् + सि →

मरीमार्ज् + सि →
यायज् + सि →
राराज् + सि →
बाभ्राज् + सि →

<u>झकारान्तस्य एकः प्रकारः</u>— **चोः कुः** (८.२.३०) इत्यनेन कुत्वम्

जाझर्झ् + सि → **चोः कुः** (८.२.३०) इत्यनेन कुत्वम् → जाझर्घ् + सि → **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन षत्वम् → जाझर्घ् + षि → **खरि च** (८.४.५५) इत्यनेन खरि परे झलः स्थाने चरादेशः → जाझर्क् + षि → जाझर्क्षि

३. <u>ष् → क्</u>

**षढोः कः सि** (८.२.४१) = षकारस्य ढकारस्य च ककारादेशो भवति सकारे परे | **ष्टुना ष्टुः** (८.४.४१) इत्यस्य अपवादः | षश्च ढश्च तयोः इतरेतरद्वन्द्वः षढौ, तयोः षढोः | षढोः षष्ठ्यन्तं, कः प्रथमान्तं, सि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णं— **षढोः कः सि** |

यथा— कर्ष् + स्यति → **षढोः कः सि** (८.२.४१) इत्यनेन षकारस्य ककारादेशः → कर्क् + स्यति → **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन इण्कोः प्रत्ययावयवस्य सकारस्य षत्वम् → कर्क् + ष्यति → कर्क्ष्यति

४. <u>श् → ष् → क्</u>

प्रत्ययस्य आदौ सकारः झलि, अतः धात्वन्तस्य शकारस्य स्थाने षकारादेशो भवति |

**व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) = व्रश्च्, भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज्, छकारान्ताः शकारान्ताः चैषां धातूनाम् अन्तिमवर्णस्य स्थाने षकारादेशो भवति झलि पदान्ते च | अनुवृत्ति-सहितसूत्रम्— **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः झलि पदस्य अन्ते च** |

यथा—
क्रोश् + स्यति → क्रोष् + स्यति
वश् + सि → वष् + सि

अधुना ष् → क्

क्रोष् + स्यति → **षढोः कः सि** (८.२.४१) इत्यनेन षकारस्य ककारादेशः → क्रोक् + स्यति → **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन इण्कोः प्रत्ययावयवस्य सकारस्य षत्वम् → क्रोक् + ष्यति → क्रोक्ष्यति
वष् + सि → **षढोः कः सि** (८.२.४१) इत्यनेन षकारस्य ककारादेशः → वक् + सि → **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन

षत्वम् → वक् + षि → वक्षि

D. <u>टवर्गः</u>

१. <u>टकारः, ठकारः, डकारः</u>

टकारस्य, ठकारस्य, डकारस्य च प्रभावेन अग्रे स्थितस्य सकारस्य **ष्टुना ष्टुः** (८.४.४१) इत्यनेन ष्टुत्वादेशः | तदा स च षकारः खरि अस्ति इति कृत्वा टकार–ठकार–डकाराणां चरादेशः **खरि च** (८.४.५५) इत्यनेन |

रारट् + सि → **ष्टुना ष्टुः** (८.४.४१) इत्यनेन ष्टुत्वादेशः → रारट् + षि → **खरि च** (८.४.५५) इत्यनेन खरि परे झलः स्थाने चरादेशः → रारट् + षि → रारट्षि
लोलोठ् + सि → **ष्टुना ष्टुः** (८.४.४१) → **खरि च** (८.४.५५) → लोलोट्षि
चाकड् + सि → **ष्टुना ष्टुः** (८.४.४१) → **खरि च** (८.४.५५) → चाकट्षि

**ष्टुना ष्टुः** (८.४.४१) = दन्त्यसकारस्य तवर्गीयवर्णस्य च स्थाने मूर्धन्यषकारादेशः टवर्गीयवर्णादेशश्च भवतः, मूर्धन्यषकार–टवर्गीयवर्णयोः योजनेन | अनुवृत्ति–सहितसूत्रं— **स्तोः ष्टुना ष्टुः संहितायाम्** |

२. <u>ढकारः</u>

ढकारस्य **षढोः कः सि** (८.२.४१) इत्यनेन ककारादेशः, तदा **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन इण्कोः प्रत्ययावयवस्य सकारस्य षत्वम् |

वावढ् + सि → **षढोः कः सि** (८.२.४१) → वावक् + सि → **आदेशप्रत्यययोः** (८.३.५९) → वावक्षि

३. <u>णकारः</u>

रंरण् + सि → णकारस्य प्रभावेन **ष्टुना ष्टुः** (८.४.४१) इत्यनेन अग्रे स्थितस्य सकारस्य ष्टुत्वादेशः → रंरण्षि

E. <u>तवर्गः</u>

<u>तकारः, थकारः, दकारः, धकारः</u>

धातोः अन्तिमो वर्णः त्, थ्, द्, ध् एषु अन्यतमश्चेत्, सकारे परे **खरि च** (८.४.५५) इत्यनेन खरि परे झलः स्थाने चरादेशः → एषां स्थाने तकारादेशः |

त्, थ्, द्, ध् → त् | **खरि च** (८.४.५५) इत्यनेन सकारे परे, तवर्गीयाणां प्रथमसदस्यादेशः | सकारस्य कोऽपि विकारो न भवति |

यथा—

चाचत् + सि → **खरि च** (८.४.५५) इत्यनेन प्रथमसदस्यादेशः → चाचत् + सि → चाचत्सि
वाव्यथ् + सि → **खरि च** (८.४.५५) इत्यनेन प्रथमसदस्यादेशः → वाव्यत् + सि → वाव्यत्सि
अद् + स्यति → **खरि च** (८.४.५५) इत्यनेन प्रथमसदस्यादेशः → अत् + स्यति → अत्स्यति
क्रोध् + स्यति → **खरि च** (८.४.५५) इत्यनेन प्रथमसदस्यादेशः → क्रोत् + स्यति → क्रोत्स्यति

विशेषः—
अस्मिन् समूहे बशो भष् (३४ → ४४) इत्यस्य सम्भावना वर्तते |

**एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) = बशः भषादेशः

यथा—

बन्ध् + स्यति → **एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) इत्यनेन धातोरवयवो यो झषन्त एकाच्, तस्य बशः भषादेशः सकारे परे → भन्ध् + स्यति → **खरि च** (८.४.५५) इत्यनेन प्रथमसदस्यादेशः → भन्त् + स्यति → भन्त्स्यति
बुध् + स्यते → **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणः → बोध् + स्यते → **एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) इत्यनेन भषादेशः → भोध् + स्यते → **खरि च** (८.४.५५) इत्यनेन प्रथमसदस्यादेशः → भोत् + स्यते → भोत्स्यते

परिचयः— धातोः आदौ बश् (ब, ग, ड, द) अपि च अन्ते झष् (झ, भ, घ, ढ, ध), तस्य धातोः नाम एकाच्–बशादि–झषन्तधातुः | यथा बन्ध्–धातुः, बुध्–धातुः च | यदि उपर्युक्त–हकारान्तधातुसम्बद्ध–सूत्रैः हकारस्य स्थाने झषादेशः सञ्जातः (दृष्टान्ते— दुह् → दुघ्) तर्हि सोऽपि तादृशो धातुः | एकाच्–बशादि–झषन्तधातोः आदौ स्थितस्य बशः स्थाने भषादेशो भवति (भ, घ, ढ, ध) सकारादि–प्रत्यये परे, ध्व–शब्दे परे, पदान्ते च | अतः वदामः यत् '३४ → ४४' इत्युक्तौ यत्र धातोः आदौ वर्गस्य तृतीयसदस्यः (३), अन्ते च वर्गस्य चतुर्थसदस्यः (४), तत्र आदौ स्थितस्य तृतीयसदस्यस्य स्थाने चतुर्थसदस्यादेशो भवति (३ → ४) | आहत्य ३४ → ४४ इति विकारः | धेयं यत् अयं बश्–वर्णः धातोः अन्तिम–अंशस्य आदौ अपि भवितुमर्हति | अनेन धातुः अनेकाच् चेदपि, तस्य धातोः एकाच्–बशादि–झषन्तधात्वंशः अस्ति चेत्, अत्रापि ३४ → ४४ इति विकारो भवति |

**एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) = धातोरवयवो यो झषन्त एकाच्, तस्य बशः भषादेशो भवति सकारे परे, ध्व–शब्दे परे, पदान्ते च | अनुवृत्तिसहितसूत्रे '**एकाचः झषन्तस्य**' इत्यनयोरेव विशेषणविशेष्यभावः; धातोः तादृशांशः इति तात्पर्यम् | अनेन धातोः एकाच् वा तदधिकाः वा अर्हाः | एकोऽच् यस्मिन् स एकाच् बहुव्रीहिः, तस्य एकाचः | झष् अन्ते यस्य स झषन्तः बहुव्रीहिः, तस्य झषन्तस्य | स् च ध्व् च स्ध्वौ इतरेतरद्वन्द्वः, तयोः स्ध्वोः | एकाचः षष्ठ्यन्तं, बशः षष्ठ्यन्तं, भष् प्रथमान्तं, झषन्तस्य षष्ठ्यन्तं, स्ध्वोः सप्तम्यन्तं, अनेकपदमिदं सूत्रम् | **दादेर्धातोर्घः** (८.२.३२) इत्यस्मात् **धातोः** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **धातोः एकाचः झषन्तस्य बशः भष् स्ध्वोः पदस्य अन्ते च** |

<u>नकारः</u>

सकारः झलि अतः **नश्चापदान्तस्य झलि** (८.३.२४) इत्यनेन अपदान्तस्य नकारस्य स्थाने अनुस्वारादेशः |

हन् + सि → हंसि
मन् + स्यते → मंस्यते

**नश्चापदान्तस्य झलि** (८.३.२४) = अपदान्तस्य नकारस्य मकारस्य च स्थाने अनुस्वारादेशो भवति झलि परे | झल्–प्रत्याहारे वर्गस्य प्रथमः, द्वितीयः, तृतीयः, चतुर्थः च वर्णाः अपि च श्, ष्, स्, ह् इति वर्णाः अन्तर्भूताः | पदस्य अन्तः पदान्तः, न पदान्तः अपदान्तः तस्य अपदान्तस्य | नः षष्ठ्यन्तं, च अव्ययपदम्, अपदान्तस्य षष्ठ्यन्तं, झलि सप्तम्यन्तं, अनेकपदमिदं सूत्रम् | **मोऽनुस्वारः** (८.३.२३) इत्यस्मात् **मः**, **अनुस्वारः** इत्यनयोः अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अपदान्तस्य मः नः च अनुस्वारः झलि संहितायाम्** |

F. <u>पवर्गः</u>

<u>पकारः, फकारः, बकारः, भकारः</u>

धातोः अन्तिमो वर्णः प्, फ्, ब्, भ् एषु अन्यतमश्चेत्, सादिप्रत्यये परे तस्य वर्णस्य स्थाने पकारो भवति |

प्, फ्, ब्, भ् → प् | **खरि च** (८.४.५५) इत्यनेन सकारे परे, पवर्गीयवर्णानामपि प्रथमसदस्यादेशो भवति | सकारस्य कोऽपि विकारो न भवति |

यथा—
आप् + स्यति → **खरि च** (८.४.५५) इत्यनेन प्रथमसदस्यादेशः → आप् + स्यति → आप्स्यति
रारफ् + सि → **खरि च** (८.४.५५) इत्यनेन प्रथमसदस्यादेशः → रारप् + सि → रारप्सि
चाकब् + सि → **खरि च** (८.४.५५) इत्यनेन प्रथमसदस्यादेशः → चाकप् + सि → चाकप्सि
लालभ् + सि → **खरि च** (८.४.५५) इत्यनेन प्रथमसदस्यादेशः → लालप् + सि → लालप्सि

भष्–भावः
दादम्भ् + सि → **एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) इत्यनेन धातोरवयवो यो झषन्त एकाच्, तस्य बशः भषादेशः सकारे परे → दाधम्भ् + सि → **खरि च** (८.४.५५) इत्यनेन चर्त्वादिशः → दाधम्प् + सि → दाधम्प्सि

अत्र **नश्चापदान्तस्य झलि** (८.३.२४) इत्यनेन नकारस्य अनुस्वारः, **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यनेन अनुस्वारस्य मकारः इति यथासामान्यं भवति |

<u>मकारः</u>

सकारः झलि अतः **नश्चापदान्तस्य झलि** (८.३.२४) इत्यनेन अपदान्तस्य मकारस्य स्थाने अनुस्वारादेशः |

रम् + स्यते → **नश्चापदान्तस्य झलि** (८.३.२४) → रंस्यते
नम् + स्यति → **नश्चापदान्तस्य झलि** (८.३.२४) → नंस्यति
संगम् + स्यते → **नश्चापदान्तस्य झलि** (८.३.२४) → संगंस्यते

G. <u>यकारः, वकारः</u>

<u>यकारस्य</u> लोपः भवति सकारे परे | सकारः वल्–प्रत्याहारे विद्यमानत्वात् |

जहाय् + सि → जहासि

**लोपो व्योर्वलि** (६.१.६६) = वकारयकारयोः लोपो भवति वल्–प्रत्याहारे परे | व् च य् च व्यौ इतरेतरद्वन्द्वः, तयोः व्योः | लोपः प्रथमान्तं, व्योः षष्ठ्यन्तं, वलि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णं— **व्योः लोपः वलि** |

<u>वकारस्य</u> अपि **लोपो व्योर्वलि** (६.१.६६) इत्यनेन लोपो भवति | किन्तु वस्तुतस्तु समग्रसंस्कृतभाषायां द्वयोः धात्वोः एव उदाहरणं भवति, तच्च यङ्लुकि एव | अन्यत्र सर्वत्र सार्वधातुकप्रक्रियायां विकरणप्रत्ययः मध्ये आयाति; आर्धधातुकप्रक्रियायाम् इडागमः मध्ये आयाति | अतः वकारसम्बद्ध–हल्–सन्धेः अवसरः नास्ति |

यङ्लुकि आधिक्येन ये वकारान्तधातवः भवन्ति, तेषां सकारे परे **राल्लोपः** (६.४.२१) इत्यनेन वकारलोपो भवति | अपि च येषां वकारान्तधातूनां **राल्लोपः** (६.४.२१) इत्यनेन वकारलोपः न भवति स्म, नाम येषां धातूनां वकारात् पूर्वं रेफः नास्ति, तेषां धातूनां यङ्लुक्–धातुः एव न भवति महाभाष्यस्य ज्ञापनात् | यथा दिव्–धातुः; महाभाष्यस्य ज्ञापकत्वात् तस्य यङ्लुगन्तधातुः न भवति | ष्ठिवु (ष्ठिव्)–धातुः अपि तथा |

येषां वकारान्तधातूनाम् अन्तिमवकारात् प्राक् रेफः अस्ति, यथा धुर्व्, तुर्व्, थुर्व्, दुर्व्, मूर्व्, पूर्व्, खर्व्, गर्व्, चर्व्, पर्व्, भर्व्, मर्व्, शर्व्, षर्व्, एतादृशेभ्यः वकारान्तधातुभ्यः यङः लुक् भवति | किन्तु एषाम् अन्तिमवकारस्य लोपो भवति **राल्लोपः** (६.४.२१) इति सूत्रेण |

तोतुर्व् + सि → **राल्लोपः** (६.४.२१) इत्यनेन झलादि–प्रत्यये परे वकारलोपः → तोतुर् + सि → **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन उपधा–गुणः → तोतोर् + सि → **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन इण्कोः प्रत्ययावयवस्य सकारस्य षत्वम् → तोतोर्षि

**राल्लोपः** (६.४.२१) = रेफात् परस्य छकारस्य वकारस्य च लोपो भवति अनुनासिकादि–प्रत्यये परे, क्वि परे, झलादि–प्रत्यये च परे | रात् पञ्चम्यन्तं, लोपः प्रथमान्तं, द्विपदमिदं सूत्रम् | **च्छ्वोः शूडनुनासिके च** (६.४.१९) इत्यस्मात् **च्छ्वोः** इत्यस्य अनुवृत्तिः; अत्र धेयं यत् अनुवृत्तौ 'तक्–सहितः छकारः' सत्यपि व्याख्याने तुगागमो नापेक्षितः अतः न स्वीकृतः | **अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) इत्यस्मात् **अनुनासिकस्य, क्विझलोः** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य रात् च्छ्वोः लोपः अनुनासिके क्विझलोः** |

महाभाष्ये दत्तम् अस्ति यत् **च्छ्वोः शूडनुनासिके च** (६.४.१९) इत्यनेन ये ऊठ्–भाविनः वकारान्तधातवः सन्ति, तेषां यङ्लुक् न भवति | ऊठ्–भावी धातुः इत्युक्ते तादृशधातुः यस्य **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रेण ऊठ्–आदेशः सम्भवति |

**च्छ्वोः शूडनुनासिके च** (६.४.१९) = तुक्–सहित–छकारस्य स्थाने शकारादेशः अपि च वकारस्य स्थाने ऊठ्–आदेशो भवति अनुनासिकादि–प्रत्यये परे, क्वि परे, झलादि–प्रत्यये च परे | च्छ् च व् च तयोरितरेतरद्वन्द्वः च्छ्वौ, तयोः च्छ्वोः | श् च ऊठ् च तयोः समाहारद्वन्द्वः शूड् | **झलां जशोऽन्ते** (८.२.३९) इत्यनेन ठकारस्य स्थाने डकारः | च्छ्वोः षष्ठ्यन्तं, शूड् प्रथमान्तम्, अनुनासिके सप्तम्यन्तं, च अव्ययपदम्, अनेकपदमिदं सूत्रम् | **अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) इत्यस्मात् **क्विझलोः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **च्छ्वोः अङ्गस्य शूड् क्विझलोः अनुनासिके च** |

तर्हि द्वयोः धात्वोः एव यङ्लुकि हल्–सन्धेः अवसरो भवति, तौ च कौ ? स्रिव्, मव् इति द्वौ धातू ऊठ्–भाविनौ, किन्तु **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) इति सूत्रेण न तु **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रेण | अस्मिन् सूत्रे एतौ द्वौ वकारान्तधातू साक्षात् उल्लेखितौ, अतः एतौ द्वावेव ययोः यङ्लुक् रूपं भवति | (अस्मिन् सूत्रे अव्–धातुः अपि पठितः, किन्तु स च धातुः अजादिः इति कारणतः यङ्–प्रत्ययः न विधीयते; तदर्थं तस्य यङ्लुक् अपि न भवति |)

**ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) = ज्वर्, त्वर्, स्रिव्, अव्, मव् इत्येषां धातूनाम् उपधा च वकारः चेत्यनयोः मिलित्वा स्थाने ऊठ्–आदेशो भवति अनुनासिकादि–प्रत्यये परे, क्वि परे, झलादि–प्रत्यये च परे | ज्वरश्च त्वरश्च स्रिविश्च अविश्च मव् च तेषामितरेतरद्वन्द्वः ज्वरत्वरस्रिव्यविमवः, तेषां ज्वरत्वरस्रिव्यविमवाम् | ज्वरत्वरस्रिव्यविमवाम् षष्ठ्यन्तम्, उपधायाः षष्ठ्यन्तं, च अव्ययं, त्रिपदमिदं सूत्रम् | **च्छ्वोः शूडनुनासिके च** (६.४.१९) इत्यस्मात् **वः**, **ऊठ्**, **अनुनासिके** इत्येषाम् अनुवृत्तिः | **अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) इत्यस्मात् **क्विझलोः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ज्वरत्वरस्रिव्यविमवाम् अङ्गस्य उपधायाः वः च ऊठ् क्विझलोः अनुनासिके च** |

<u>द्वयोः वकारान्तधात्वोः हल्–सन्धौ वकारलोपः</u>

मव्–धातोः यङ्लुकि मामव् इति धातुरूपम् | लटि मामव् रूपाणि इमानि—
मामव् + ति → **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) → मामोति
मामव् + तः → **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) → मामूतः
मामव् + अति→ मामवति
मामव् + सि → **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) → मामोषि
मामव् + थः → **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) → मामूथः
मामव् + थ → **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) → मामूथ
मामव् + मि → **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) → मामोमि
मामव् + मः → **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) → मामूमः

किन्तु 'मामव् + वः' इति स्थले 'वः' प्रत्ययस्य आदौ वकारः न झल्–वर्णः न वा अनुनासिकः | किन्तु वल्–प्रत्याहारे तु अस्ति, अतः अत्र **लोपो व्योर्वलि** (६.१.६६) इत्यस्य अवसरो भवति |

मामव् + वः → माम + वः → मामावः

लङि च— अमामव् + व → अमामाव

**अतो दीर्घो यञि** (७.३.१०१) = अदन्ताङ्गस्य दीर्घत्वं यञादि–सार्वधातुकप्रत्यये परे | यञ् प्रत्याहारः = य व र ल ञ म ङ ण न झ भ | अतः षष्ठ्यन्तं, दीर्घः प्रथमान्तं, यञि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **तुरुस्तुशम्यमः सार्वधातुके** (७.३.९५) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते ह्रस्व–अकारः अस्ति; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य स्थाने आदेशः; **यस्मिन् विधिस्तदादावल्ग्रहणे** (१.१.७२, वार्तिकम् २९) इत्यनेन **यञि सार्वधातुके** इत्युक्तौ यञादि–सार्वधातुके | अनुवृत्ति–सहितसूत्रम्— **अतः अङ्गस्य दीर्घः यञि सार्वधातुके** |

अतः वकारान्तधातोः हल्सन्धेः उदाहरणं लभ्यते किन्तु केवलं वकारादिप्रत्यये परे | सकारादिप्रत्यये परे ऊठ्भावो भवति; स च ऊठ्भावः अङ्गकार्यं न तु सन्धिकार्यम् |

एवमेव स्रिव् → सेस्रिव् इति यङ्लुगन्तधातुः | लटि रूपाणि कल्पनीयानि | पित्सु प्रत्ययेषु **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) इत्यस्य नित्यत्वात् सर्वप्रथमं भवति, न तु **पुगन्तलघूपधस्य च** (७.३.८६) |

H. <u>लकारः</u>

लकारस्य विकारो नास्ति; **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन इण्कोः प्रत्ययावयवस्य सकारस्य षत्वम् |

गल् → जागल् + सि → **आदेशप्रत्यययोः** (८.३.५९) → जागल्षि
तल् → तातल् + सि → तातल्षि
दल् → दादल् + सि → दादल्षि

I. <u>रेफः</u>

रेफस्य विकारो नास्ति; **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन इण्कोः प्रत्ययावयवस्य सकारस्य षत्वम् |

(जागृ + सि →) जागर् + सि → **आदेशप्रत्यययोः** (८.३.५९) → जागर्षि

J. <u>सकारः</u>

धातोरन्तिमो वर्णः सकारश्चेत्, सार्वधातुकप्रत्यये परे केवलं वर्णमेलनम्; आर्धधातुकप्रत्यये परे धात्वङ्गसकारस्य तकारादेशो भवति, **सः स्यार्धधातुके** (७.४.४९) इति सूत्रेण |

धातुः सकारान्तः चेत्, तर्हि प्रत्ययः सार्वधातुको वा आर्धधातुको वा इति विचार्यताम् |

प्रत्ययः सार्वधातुकः चेत्, केवलं वर्णमेलनम्—
आस् + से → आस्से

प्रत्ययः आर्धधातुकः चेत्, धात्वङ्गसकारस्य तकारादेशो भवति—

वस् + स्यति → **सः स्यार्धधातुके** (७.४.४९) इत्यनेन सकारादि-आर्धधातुकप्रत्यये परे सकारस्य स्थाने तकारादेशः → वत् + स्यति → वत्स्यति
घस् + स्यति → **सः स्यार्धधातुके** (७.४.४९) → घत् + स्यति → घत्स्यति

**सः स्यार्धधातुके** (७.४.४९) = सकारस्य स्थाने तकारादेशो भवति सकारादि-आर्धधातुकप्रत्यये परे | सः षष्ठ्यन्तं, सि सप्तम्यन्तम्, आर्धधातुके सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **अच उपसर्गात्तः** (७.४.४७) इत्यस्मात् **तः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **सः अङ्गस्य तः सि आर्धधातुके** |

धेयं यत् **सः स्यार्धधातुके** (७.४.४९) इति सूत्रे तदन्तविधिः च अन्तादेश्च नापेक्षितः यतोहि '**सः तः सि**' इत्यस्य कथनेन सकारयोः अव्यव्यहितव्यवस्था निश्चिता भवति | कः वर्णः कुत्र भवेत् इत्यस्मिन् विषये न काऽपि शङ्का |

K. <u>हकारः</u>

हकारान्तधातुः + सकारादिप्रत्ययः| धातोरन्तिमो वर्णः हकारश्चेत्, नह्-धातुम् अतिरिच्य सर्वत्र हकारस्य ककारः | **हो ढः** (८.२.३१) + **षढोः कः सि** (८.२.४१) अथवा **दादेर्धातोर्घः** (८.२.३२) + **खरि च** (८.४.५५) |

१. सामान्यनियमः

- सकारादि-प्रत्यये परे, धात्वन्तस्य हकारस्य स्थाने ढकारादेशो भवति, **हो ढः** (८.२.३१) इत्यनेन सूत्रेण |
- तदा ढकारस्य स्थाने ककारादेशो भवति **षढोः कः सि** (८.२.४१) इत्यनेन सूत्रेण |
- अन्ते प्रत्ययावयवस्य सकारस्य स्थाने षकारादेशो भवति, **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन सूत्रेण |

यथा— वह् + स्यति → **हो ढः** (८.२.३१) → वढ् + स्यति → **षढोः कः सि** (८.२.४१) → वक् + स्यति → **आदेशप्रत्यययोः** (८.३.५९) → वक् + ष्यति → वक्ष्यति

**हो ढः** (८.२.३१) = हकारस्य स्थाने ढकारादेशो भवति झलि पदान्ते च | हः षष्ठ्यन्तं, ढः प्रथमान्तं, द्विपदमिदं सूत्रम् | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **हः ढः झलि पदस्य अन्ते च** |

**षढोः कः सि** (८.२.४१) = षकारस्य ढकारस्य च ककारादेशो भवति सकारे परे | **ष्टुना ष्टुः** (८.४.४१) इत्यस्य अपवादः | षश्च ढश्च तयोः इतरेतरद्वन्द्वः षढौ, तयोः षढोः | षढोः षष्ठ्यन्तं, कः प्रथमान्तं, सि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णं— **षढोः कः सि** |

२. बकारादीनां गकारादीनां च धातूनां भष्भावः भवति; तत्रापि हकारस्य ककारः **हो ढः** (८.२.३१) + **षढोः कः सि** (८.२.४१) इति सूत्राभ्याम् | यथा बर्ह्, बृंह्, गृह्, गाह्, गुह् इति धातवः |

- सकारादि-प्रत्यये परे, बकारादि-, गकारादि-हकारान्तानां धातूनां हकारस्य स्थाने ढकारादेशो भवति, **हो ढः** (८.२.३१) इत्यनेन सूत्रेण |
- अधुना एकाच्-बशादि-झषन्तधात्वंशः जातः (३४ इति) | अतः **एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) इत्यनेन **(**३४ – ४४) आदौ तृतीयसदस्य स्थाने चतुर्थसदस्यादेशो भवति |
- तदा **षढोः कः सि** (८.२.४१) इत्यनेन ढ्-स्थाने ककारादेशः |
- कवर्गीयवर्णः पूर्वम् अस्ति अतः **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन स्-स्थाने षत्वम् |

यथा— बाबृंह् + सि → **हो ढः** (८.२.३१) → बाबृंढ् + सि → **एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) → बाभृंढ् + सि → **षढोः कः सि** (८.२.४१) → बाभृंक् + सि → **आदेशप्रत्यययोः** (८.३.५९) → बाभृंक् + षि → बाभृंक्षि → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → बाभृङ्क्षि

गर्ह् + स्यते → **हो ढः** (८.२.३१) → गर्ढ् + स्यते → **एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) → घर्ढ् + स्यते → **षढोः कः सि** (८.२.४१) → घर्क् + स्यते → **आदेशप्रत्यययोः** (८.३.५९) → घर्क् + ष्यते → घर्क्ष्यते

एवमेव—
गाह् + स्यते → घाक् + ष्यते → घाक्ष्यते
गोह् + स्यते → घोक् + ष्यते → घोक्ष्यते

**हो ढः** (८.२.३१) = हकारस्य स्थाने ढकारादेशो भवति झलि पदान्ते च | हः षष्ठ्यन्तं, ढः प्रथमान्तं, द्विपदमिदं सूत्रम् | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **हः ढः झलि पदस्य अन्ते च** |

**एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) = धातोरवयवो यो झषन्त एकाच्, तस्य बशः भषादेशो भवति सकारे परे, ध्व-शब्दे परे, पदान्ते च | अनुवृत्तिसहितसूत्रे '**एकाचः झषन्तस्य**' इत्यनयोरेव विशेषणविशेष्यभावः; धातोः तादृशांशः इति तात्पर्यम् | अनेन धातोः एकाच् वा तदधिकाः वा अर्हाः | अनुवृत्ति-सहितसूत्रं— **धातोः एकाचः झषन्तस्य बशः भष् स्ध्वोः पदस्य अन्ते च** |

३. दकारादि–हकारान्तेषु हकारस्य ककारः अस्त्येव, किन्तु मार्गः **दादेर्धातोर्घः + खरि च** (८.४.५५) (यथा दह्, दिह्, दुह्, द्रुह्,) | अत्र भष्भावः अपि भवति |

- सकारादि–प्रत्यये परे, दकारादिधातोः हकारस्य स्थाने घकारादेशो भवति **दादेर्धातोर्घः** इत्यनेन सूत्रेण |
- तदा आदौ स्थितस्य दकारस्य धकारादेशो भवति **एकाचो बशो भष् झषन्तस्य स्ध्वोः** इत्यनेन |
- खर् परे अस्ति अतः **खरि च** (८.४.५५) इत्यनेन घकारस्य स्थाने ककारादेशो भवति |
- कवर्गीयवर्णः पूर्वम् अस्ति अतः **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन स्–स्थाने षत्वम् |

यथा— दुह् + स्यते → **पुगन्तलघूपधस्य च** (७.३.८६) → दोह् + स्यते → **दादेर्धातोर्घः** (८.२.३२) → दोघ् + स्यते → **एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) → धोघ् + स्यते → **आदेशप्रत्यययोः** (८.३.५९) → धोघ् + ष्यते → **खरि च** (८.४.५५) → धोक् + ष्यते → धोक्ष्यते

**दादेर्धातोर्घः** (८.२.३२) = दकारादिधातोः हकारस्य स्थाने घकारादेशो भवति झलि पदान्ते च | दः आदौ यस्य स दादिः, तस्य दादेः, बहुव्रीहीः | दादेः षष्ट्यन्तं, धातोः षष्ठ्यन्तं, घः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **हो ढः** (८.२.३१) इत्यस्मात् **हः** इत्यस्य अनुवृत्तिः | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **दादेः धातोः हः घः झलि पदस्य अन्ते च** |

एवमेव—
दुह् + स्यति → गुणः → दोह् + स्यति → दोघ् + स्यति → धोघ् + ष्यति → धोक् + ष्यति → धोक्ष्यति
दिह् + स्यति → देह् + स्यति → → धेक् + ष्यति → धेक्ष्यति
द्रुह् + स्यति → द्रोह् + स्यति → → द्रोक् + ष्यति → ध्रोक्ष्यति
दह् + स्यति → → धक् + ष्यति → धक्ष्यति

**वा द्रुहमुहष्णुहष्णिहाम्** (८.२.३३) = द्रुह्, मुह्, ष्णुह्, ष्णिह् एषां चतुर्णां धातूनां हकारस्य स्थाने विकल्पेन घकारादेशो भवति झलि पदान्ते च; घ्–अभावे **हो ढः** (८.२.३१) इत्यनेन ढकारादेशो भवति | द्रुहश्च मुहश्च ष्णुहश्च ष्णिहश्च तेषाम इतरेतर्तद्वान्द्वः, द्रुहमुहष्णुहष्णिहः, तेषां द्रुहमुहष्णुहष्णिहाम् | वा अव्ययपदं, द्रुहमुहष्णुहष्णिहां षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **हो ढः** (८.२.३१) इत्यस्मात् **हः**, **दादेर्धातोर्घः** (८.२.३२) इत्यस्मात् **घः**, **झलो झलि** (८.२.२६) इत्यस्मात् **झलि**, **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्येषाम् अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **द्रुह–मुह–ष्णुह–ष्णिहाम् वा हः घः झलि पदस्य अन्ते च** |

४. नह्–धातुः | अत्र एकैव धातुः यत्र हकारस्य गतिः भिन्ना— अत्र हकारस्य तकारो भवति |

सकारादि–प्रत्यये परे, अपवादभूतस्य नह्–धातोः हकारस्य स्थाने धकारादेशो भवति **नहो धः** इत्यनेन सूत्रेण | तदा **खरि च** इत्यनेन चर्त्वं कृत्वा धस्थाने तकारादेशो भवति | सकारस्य कोऽपि विकारो न भवति |

नह् + स्यति → **नहो धः** (८.२.३४) → नध् + स्यति → **खरि च** (८.४.५५) → नत् + स्यति → नत्स्यति

**नहो धः** (८.२.३४) = नह्–धातोः हकारस्य धकारादेशो भवति झलि पदान्ते च। नहः षष्ठ्यन्तं, धः प्रथमान्तं, द्विपदमिदं सूत्रम्। **हो ढः** (८.२.३१) इत्यस्मात् **हः** इत्यस्य अनुवृत्तिः। **दादेर्धातोर्घः** (८.२.३२) इत्यस्मात् **धातोः** इत्यस्य अनुवृत्तिः। **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः। **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः। **पदस्य** (८.१.१६) इत्यस्य अधिकारः। अनुवृत्ति–सहितसूत्रम्— **नहः धातोः हः धः झलि पदस्य अन्ते च**।

<u>अभ्यासः</u>

अदादिगणस्य लट्–लकारस्य मध्यमपुरुषैकवचने, परस्मैपदे 'सि', आत्मनेपदे 'से' इति यथासङ्गं योजयित्वा सूत्रसहितक्रमं श्रावयित्वा रूपाणि पूरयतु —

- वस् + से →
- द्विष् + सि →
- हन् + सि →
- णिसि + से →
- विद् + सि →
- संविद् + से →
- वच् + सि →
- लिह् + सि →
- मृज् + सि →
- संस्त् + सि →
- पृच् + से →
- दुह् + सि →
- निंज् + से →
- अद् + सि →
- वश् + सि →
- चक्ष् + से →
- आस् + से →
- कसि + से →
- शास् + सि →
- दिह् + सि →

अन्यच्च लृटि कथं भवति ?

वच् + स्यति →
शास् + स्यति →

संस्त् + स्यति →

यङ्लुकि—

मघि → मामङ्घ् + सि →
प्रच्छ् → पाप्रच्छ् + सि →
दुह् → दोदुह् + सि →
व्रश्च् → वाव्रश्च् + सि →
स्यन्दू → स्यन्द् → सास्यन्द् + सि →
सृज् → सरीसृज् → सृजिदृशेर्झल्यमकिति (६.१.५८) इत्यनेन अम्–आगमः → सरीसृ–अ–ज् → इको यणचि इत्यनेन यण् → सरीस्रज् + सि →
मुर्छा → मुर्छ्–धातुः, यङ्लुकि मोमुर्छ्–धातुः + सि →
बुध् → बोबुध् + सि →
लाछि → लाछ् → लान्छ् → लालान्छ् + सि →
भ्रस्ज् → बाभ्रस्ज् + सि →
दध् → दादध् + सि →
भ्रम् → बम्भ्रम् + सि →
ध्रस् → दाध्रस् + सि →
सृप् → सरीसृप् + सि →
जसि → जन्स् → जाजन्स् + सि →
हुर्छा → हुर्छ् → होहुर्छ् + सि →
वृत् → वरीवृत् + सि →
तुर्वी → तोतुर्व् + सि →
वृध् → वरीवृध् + सि →
दुर्वी → दोदुर्व् + सि →
वृश् → वरीवृश् + सि →
मुर्वी → मोमुर्व् + सि →
कृश् → चरीकृश् + सि →
कृष् → चरीकृष् + सि →

परिशिष्टम्

कश्चन प्रश्नः उदेति— **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रेण तुक्–सहित–छकारस्य स्थाने शकारादेशः | एवम् अस्ति चेत्, 'पाप्रच्छ् + सि' इति स्थितौ किमर्थं न **च्छ्वोः शूडनुनासिके च** (६.४.१९) इत्यनेन तुक्–सहित–छकारस्य शत्वम् ? दत्तम् आसीत्—

छकारान्तधातूनां कृते सामान्यम् = **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन षत्वम् |

पाप्रच्छ् + सि → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) → पाप्रष् + सि → **षढोः कः सि** (८.२.४१) → पाप्रक् + सि → पाप्रक् + षि → पाप्रक्षि

किन्तु वस्तुतस्तु अत्र **च्छ्वोः शूडनुनासिके च** (६.४.१९) इत्यस्य प्रसक्तिरस्ति किल | प्रसक्तिरस्ति चेत्, **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रम् असिद्धम् | तर्हि अत्र का गतिः ?

यथा जानीमः, पाणिनिना न उच्यते कस्मिन् कस्मिन् सूत्रे कस्य कस्य अनुवृत्तिः | वैयाकरणाः विचिन्त्य अस्मान् सूचयन्ति | कुत्रचित् किन्तु विभिन्नपक्षाः भवन्ति | यथा अत्र | काशिकाकारः लिखति यत् **च्छ्वोः शूडनुनासिके च** (६.४.१९), **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) इत्यनयोः द्वयोः सूत्रयोः अपि **क्ङिति** इत्यस्य अनुवृत्तिः | नाम अनयोः सूत्रयोः कार्यं भवति क्ङिति झलादि-प्रत्यये परे | सिद्धान्तकौमुद्यां दीयते यत् **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रे क्ङिति इत्यस्य अनुवृत्तिः अस्ति, किन्तु **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) इति सूत्रे नास्ति | महाभाष्ये उक्तमस्ति यत् **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) इति सूत्रे नास्ति अनुवृत्तिः; **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति स्थले भाष्यकारः पक्षद्वयं प्रतिपादयति— एकस्मिन् पक्षे क्ङिति अस्ति, अपरस्मिन् पक्षे नास्ति |

अस्य सर्वस्य महत्त्वं किम् ? **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) इति सूत्रे क्ङिति इत्यस्य अनुवृत्तिः भवति चेत्, मामोति इति रूपं न सेत्स्यति | तिप् इत्यस्य पित्त्वात् अयं ङिद्वत् न, तदर्थम् ऊठादेशो न (न **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) इत्यनेन न वा **च्छ्वोः शूडनुनासिके च** (६.४.१९) इत्यनेन) | मामव् + ति → **लोपो व्योर्वलि** (६.१.६६) → मामति इति अनिष्टं रूपम् | अतः माता जी वदति यत् अत्र काशिकाकारस्य मतं मतमेव नास्ति अपि तु साक्षात् दोषः | तदर्थं **ज्वरत्वरस्रिव्यविमवामुपधायाश्च** (६.४.२०) इति सूत्रे काशिकाकारस्य पक्षं त्यजामः | अस्मिन् सूत्रे क्ङिति इत्यस्य अनुवृत्तिः न भवेत्, नास्त्येव |

तर्हि **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रे का गतिः ? वस्तुतः न केवलं सिद्धान्तकौमुद्याम् अपि तु बहुषु ग्रन्थेषु दत्तम् अस्ति यत् क्ङिति इत्यस्य अनुवृत्तिः अत्र वर्तते | तथा अस्ति चेत् कः परिणामः ? तुक्-सहित-छकारस्य स्थाने शकारादेशः क्ङिति झलादि-प्रत्यये परे | एवं चेत् 'पाप्रच्छ् + सि' इति स्थले अस्य सूत्रस्य प्रसक्तिर्नास्ति | एतावता अस्माकं पाठेषु एतादृशस्य पक्षस्य आश्रयं स्वीकृत्य प्रतिपादनं भवति स्म | यथोक्तं महाभाष्ये पक्षद्वयस्य समर्थनम् |

महाभाष्यस्य प्रमाणेन पक्षद्वयेनाऽपि कार्यं सिध्यति— एकः अनुवृत्तिपक्षः, एकः निवृत्तिपक्षः | **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रे क्ङिति इत्यस्य अनुवृत्तिः स्वीक्रियते चेत् कित्ङ्त्-प्रत्यये परे **च्छ्वोः शूडनुनासिके च** (६.४.१९) इत्यनेन छकारस्य स्थाने शकारादेशः | तदा **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रेण शकारस्य षत्वम् | प्रत्ययः कित्ङ्त् नास्ति चेत्, **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रेण छकारस्य षत्वम् | अपि च अस्मिन् पक्षे तुक्-सहित-छकारः मन्तव्यः भवति द्वयोः अपि सूत्रयोः |

यथा 'पाप्रच्छ् + सि' इति स्थले सि-प्रत्ययः कित्ङ्त् न अतः **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रेण छकारस्य षत्वम् | किन्तु अत्र नूतनविचारः अयं यत् 'निमित्तापाये नैमित्तिकस्यापि अपायः' इति न स्वीक्रियते | भाष्यकारैः उच्यते

यत् इदं न परिभाषा न वा न्यायः, किमपि नास्ति | अस्य उपयोगो न कुत्रापि भवेत् | अनेन कारणेन **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रे तुक्–सहित–छकारः न मन्यते चेत्, छकारस्य स्थाने षकारः तु भवति, किन्तु तुक्–आगमः अपि स्थास्यति | तदर्थम् अस्मिन् सूत्रे तुक्–सहित–छकारः मन्तव्यः | अतः ये **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रे क्ङिति इत्यस्य अनुवृत्तिः स्वीकुर्वन्ति, तैः **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रे छकारः मन्तव्यः, अपि च स च छकारः तुक्–सहितः मन्तव्यः | नो चेत् लटि पाप्रष्टि, पाप्रक्षि इति रूपद्वयं न सेत्स्यति | अस्मिन् पक्षे 'पाप्रच्छ् + तः' इति स्थले पाप्रष्टः भवति **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रेण |

तदा निवृत्ति–पक्षे **च्छ्वोः शूडनुनासिके च** (६.४.१९) इत्यस्मिन् क्ङिति इत्यस्य अनुवृत्तिः नास्ति | अस्मिन् पक्षे **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रे छकारस्य आवश्यकता नास्ति | प्रछ + तृच् → कार्यद्वयं प्राप्तं— तुक्–आगमः, छकारस्य शकारः च → तुक्–आगमः अन्तरङ्गं निमित्तस्य अल्पत्वात्, शत्वस्यापेक्षया | अत्र तुक्–आगमः प्रथमं भवति, एतदर्थं **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रे तुक्–सहित–छकारः वक्तव्यः | अत्र च एका परिभाषा वर्तते **सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः** | अनेन सन्निपातलक्षणं भवति | चकारः छकारः च मिलित्वा आगच्छतः, मिलित्वा गच्छतः च |

अस्मिन् निवृत्तिपक्षे 'पाप्रच्छ् + सि' **→ च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रेण पाप्रश् + सि → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) **→** पाप्रष् + सि → पाप्रक्षि

अत्र छकारान्तधातूनां प्रसङ्गे इतोऽपि किञ्चित् | छकारात् प्राक् के के वर्णाः सम्भवन्ति ? छकारात् प्राक् ह्रस्व–अच्–वर्णः अस्ति चेत्, तुगागमो भवति | यथा इष्–धातुः | **इषुगमियमां छः** (७.३.७७) इत्यनेन इष्–धातोः छकारादेशः शिति परे | इष् + श → **इषुगमियमां छः**, **अलोन्त्यस्य** → इछ् + अ → **छे च** (६.१.७३), **आद्यन्तौ टकितौ** (१.१.४६) इत्याभ्यां छकारे परे ह्रस्वस्वरस्य (इकारस्य अनन्तरं) तुक्–आगमः → इत्छ् + अ → **स्तोः श्चुना श्चुः** (८.४.४०) **→** इच्छ् + अ → इच्छ इति अङ्गम् |

छकारात् प्राक् यदि ह्रस्ववर्णो नास्ति, कश्चन हल्–वर्णः एव भवति | नाम छकारः तुक्–सहितः नास्ति चेत्, संयोगो भवति एव | (आछि, वाछि, लाछि, एते इदित्–धातवः अतः नुमागमः; नुमागमात् संयोगग्रस्तछकारः | उच्छि इति धातौ तुगागमः |) एवं च अन्ते संयोगः अस्ति, तस्यां च दशायां **संयोगान्तस्य लोपः** (८.२.२३) इत्यनेन पदान्ते छकार–लोपो भवति | वाञ्छ्–धातुः + क्विप्–प्रत्ययः → वाञ्छ् इति प्रातिपदिकम् | प्रथमपुरुषैकवचने वाञ्छ् + सु → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) इत्यनेन हलन्तात् सु–ति–सि इत्येषाम् अपृक्तसंज्ञकस्य हलः लोपः → **संयोगान्तस्य लोपः** (८.२.२३) इत्यनेन पदान्ते छकार–लोपः → वान् | एवमेव लङ्–लकारे अवावाञ्छ् + ति → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) **→** अवावाञ्छ् → **संयोगान्तस्य लोपः** (८.२.२३) **→** अवावान् |

अनेन दृश्यते यत् छकारात् पूर्वं ह्रस्व–स्वरः नास्ति चेत्, पदान्ते संयोगः भवति, तत्र च सदा **संयोगान्तस्य लोपः** (८.२.२३) इत्यनेन छकार–लोपः | अनेन कारणेन **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रं तत्र न प्राप्नोति एव; अस्य कार्यावसरो नास्ति | लङि अवावान्; सुबन्ते वान्, वाञ्छौ, वाञ्छः | पदसंज्ञायां संयोगान्तलोपः; अपदान्ते अजादिप्रत्यये परे केवलं संयोजनं— वाञ्छौ, वाञ्छः |

वावाञ्छ् + ति → अत्र यतोहि **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति तुक्–सहित–छकारः आवश्यकः, अस्य

सूत्रस्य प्रसक्तिर्नास्ति → वावाञ्छ् + ति → **चोः कुः** (८.२.३०) इत्यनेन कुत्वम् → वावाङ्ख् + ति → **खरि च** (८.४.५५) → वावाङ्क् + ति → वावाङ्क्ति | एवमेव वावाञ्छ् + सि | अवावाञ्छ् + ताम् |

**व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रे तुक्–रहित–छकारः यदि मन्यामहे, तर्हि 'पाप्रच्छ् + सि' इति स्थले छकारस्य अस्थाने षकारः तु भवति, किन्तु तुक्–आगमः स्थास्यति | अस्य निवारणार्थं तुक्–सहित–छकारः अपेक्षितः सर्वत्र | तदर्थञ्च 'वावाञ्छ् + ति' इति स्थले तुक्–सहित–छकारस्य अभावे अस्य सूत्रस्य प्रसक्तिर्नास्ति |

आहत्य **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रे क्ङिति इत्यस्य अनुवृत्तिः भवति चेत्, **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रे छकारो भवति, स च तुक्–सहितः | **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रे अपि छकारः अपि तुक्–सहितः एव | **च्छ्वोः शूडनुनासिके च** (६.४.१९) इति सूत्रे क्ङिति इत्यस्य अनुवृत्तिः नास्ति चेत्, **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रे छकारो न भवति एव | नो चेत्, यथा पाप्रच्छ् + तः इति स्थले तुक्–आगमः स्थास्यति, इष्टरूपं न सेत्स्यति |

इति हलन्तेभ्यो धातुभ्यः सकारादि–प्रत्ययस्य योजनविधिः |

Swarup – Sept 2013 (Updated June 2018)